विशेषार्थ– जितना गच्छका प्रमाण हो उतने स्थानमें २ का अंक रखकर परस्पर गुणा करनेसे जो प्राप्त हो उसमेसे एक कम करके शेषमें एक कम गुणकार (२–१=१)का भाग दे। इस प्रकारसे जो लब्ध हो उससे मुखको गुणित करनेपर संकलित घनका प्रमाण प्राप्त होता है। तदनुसार यहां गच्छका प्रमाण ७ और मुखका प्रमाण २८००० है। अत एव उक्त नियमके अनुसार यहां सात कक्षाओंका समस्त घन निम्न प्रकारसे प्राप्त होता है – २८०००×[{(२×२×२×२×२×२×२)–१} ÷ (२–१)]=३५५६०००; एक अनीककी ७ कक्षाओंका प्रमाण । इसे ७ से गुणित करनेपर समस्त सप्तानीकका प्रमाण होता है – ३५५६०००×७=२४८९२०००।

व्यन्तरोके निकायोमे सब अनीकोकी संख्या तीन शून्य, तत्पश्चात् दो, नौ, आठ, दोका वर्ग अर्थात् चार और दो, इन अंकोंके प्रमाण कही गई है– २४८९२००० ॥ ६६ ॥ काला, कालप्रभा, कालकान्ता, कालावर्ता और कालमध्या [ये पांच नगर काल नामक पिशाचेन्द्रके होते है।] इनमेसे काला नगरी मध्यमे तथा अन्य शेष चार नगरियां पूर्वादिक चार दिशाओमे है। इसी प्रकार सब इन्द्रोंके अपने नामोके अनुसार पाच पाच नगर होते हैं ॥ ६७-६८ ॥ यहा पिशाचोंकी पांच राजधानियोंके नाम निर्दिष्ट किये है। इनके विस्तारादिका प्रमाण द्वितीय जम्बूद्वीपमें स्थित व्यन्तरनगरियोके समान है। उक्त राजधानिया चार वनोसे सुशोभित है ॥ ६९ ॥ ये वन नगरोंसे दो हजार (२०००) योजन जाकर स्थित है। वनोंकी लंबाई एक लाख (१०००००) योजन और विस्तार उससे आधा (५०००० यो.) है ॥ ७० ॥ उन नगरियोंका जो प्राकार है। वह साढ़े सेंतीस (३७$\frac{१}{२}$) योजन ऊंचा है। उसका विस्तार मूलमें साढ़े बारह (१२$\frac{१}{२}$) योजन

---

१ प ब काल । २ ब कालाकाला । ३ आ प नियुतानामयुक्तानि प नियुतानायुक्त्वानि । ४ आ प °द्वे ब °द्वि

सार्धद्विषष्टिर्द्वारस्य[1] उच्छ्रयोऽर्धा तु रुन्द्रता । पञ्चसप्ततिमुद्दिद्धः प्रासादोऽत्र च भाषितः ॥ ७२

६२ । ½ । ३१ । ¼ । ७५ ।

द्वादशार्धं च दीर्घा तु षट् तुर्यं चाथ विस्तृता । योजनानि नवोद्विद्धा सुधर्मा गाधगोरुता[2] ॥ ७३

१२ । ½ । ६ । ¼ । ९ । १ ।

द्वारं योजनविस्तारं द्विगुणोच्छ्रयमिष्यते । एवं मानानि सर्वेषु नगरेषु विभावयेत् ॥ ७४

। १ । २ ।

हरितालाह्वके द्वीपे तथा हिंगुलिकेऽपि च । मनःशिलाह्वाञ्जनयोः सुवर्णे रजतेऽपि च ॥ ७५
वज्रधातौ च वज्रे च इन्द्राणां नगराणि तु । नगराण्यपि शेषाणामनेकद्वीपवार्धिषु ॥ ७६
भवनादित्रयाणां तु जघन्या ते[तें]जसी मता । कृष्णादित्रिकलेश्याश्च तेषां सन्तीति भाषिताः ॥ ७७
अम्बा नाम्ना कराला च सुलसा च सुदर्शना । पिशाचानां निकायेषु गणिकानां महत्तराः ॥ ७८
भूतकान्ता च भूता च भूतदत्ता महाभुजा । एता भूतनिकायेषु गणिकानां महत्तराः ॥ ७९
सुघोषा[3] विमला चैव सुस्वरा चाप्यनिन्दिता । गन्धर्वाणां निकायेषु गणिकानां महत्तराः ॥ ८०
मधुरा मधुरालापा सुस्वरा मृदुभाषिणी । किंनराणां भवन्त्येता गणिकानां महत्तराः ॥ ८१
भोगा भोगवती चैका भुजगा भुजगप्रिया । महोरगनिकायेषु गणिकानां महत्तराः ॥ ८२

तथा अग्रभागमें अढ़ाई (२½) योजन प्रमाण है ॥ ७१ ॥ द्वारकी ऊंचाई साढ़े बासठ (६२½) योजन तथा विस्तार उससे आधा (३१¼) है । यहां पचहत्तर (७५) योजन ऊंचा प्रासाद कहा गया है ॥ ७२ ॥ सुधर्मा सभाकी लंबाई साढे बारह (१२½) योजन, विस्तार सवा छह (६¼) योजन, ऊंचाई नौ (९) योजन और अवगाह एक (१) योजन मात्र है ॥ ७३ ॥ उसका द्वार एक (१) योजन विस्तृत और दो (२) योजन ऊंचा है । इसी प्रकारसे उक्त विस्तारादिका प्रमाण सब ही नगरोंमें जानना चाहिये ॥ ७४ ॥ उक्त व्यन्तर इन्द्रोंके नगर हरिताल नामक द्वीपमें, हिंगुलिक द्वीपमें, मनःशिला नामक द्वीपमे, अंजन द्वीपमे, सुवर्णद्वीपमें, रजतद्वीपमें, वज्रधातु द्वीपमें और वज्रद्वीपमें; इस प्रकार इन आठ द्वीपोंमें स्थित हैं । शेष व्यन्तरोंके नगर अनेक द्वीप-समुद्रोंमें स्थित हैं ॥ ७५-७६ ॥

भवनवासी आदि तीन प्रकारके देवोंमें जघन्य तेजोलेश्या मानी गई है । उनके कृष्णादि तीन लेश्यायें भी होती हैं, ऐसा कहा गया है ॥ ७७ ॥

अम्बा, कराला, सुलसा और सुदर्शना ये पिचाच देवोंमे गणिकामहत्तरोंके नाम हैं ॥७८॥ भूतकान्ता, भूता, भूतदत्ता और महाभुजा ये भूतजातिके व्यन्तरोमे गणिकामहत्तरोंके नाम हैं ॥७९॥ सुघोषा, विमला, सुस्वरा और अनिन्दिता ये गन्धर्व जातिके व्यन्तरोंमें गणिकामहत्तरोंके नाम हैं ॥ ८० ॥ मधुरा, मधुरालापा, सुस्वरा और मृदुभाषिणी ये किनर जातिके व्यन्तरोंमें गणिकाओंके महत्तर होते हैं ॥ ८१ ॥ भोगा, भोगवती, भुजगा और भुजगप्रिया ये महोरग जातिके

१ आ प 'द्विषष्टि' । २ ब गादगो' । ३ आ प 'सुघोषा–' इत्यादिश्लोकत्रयं नास्ति ।

शर्वरी सर्वसेना च रुद्रा वं रुद्रदर्शना । राक्षसाणां[1] भवन्त्येता गणिकानां महत्तराः ॥ ८३
पुंस्प्रियाथ च पुंस्कान्ता सौम्या पुरुषदर्शिनी । एताः किंपुरुषाख्यानां गणिकानां महत्तराः ॥ ८४
भद्रा नाम्ना सुभद्रा च मालिनी पद्ममालिनी । एता यक्षनिकायेषु गणिकानां महत्तराः ॥ ८५
योजनानां सहस्राणि अशीतिश्चतुरुत्तरा । विपुलानि पुराण्याहुर्गणिकानामशेषतः[2] ॥ ८६
। ८४००० ।

अष्टास्वपि निकायेषु गणिकानां पुनः स्थितिम् । अर्धपल्योपमां ह्याहुः[3] पौराणिकमहर्षयः ॥ ८७
दश चापोच्छ्रया एते पञ्चाहादथ[4] साधिकात् । आहरन्ति मुहूर्तेभ्यस्तावद्भ्यो निःश्वसन्ति[5] च ॥
ऐशानान्ता सुराः सर्वे सप्तहस्तास्तु जन्मतः । स्वेच्छातो वैक्रियोत्सेधा ज्योतिषः सप्तचापकाः ॥
उन्मार्गस्थाः शबलचरिता ये निधानप्रयाता[6] ये चाकामाद्विषयविरताः[7] पावकाद्यैर्मृताश्च ।
ते देवानां तिसृषु गतिषु प्राप्नुवन्ति प्रसूतिं मन्दाक्रान्ता मलिनमतिभिर्यैः कषायेन्द्रियाश्वाः ॥ ९०

इति लोकविभागे मध्यमलोके व्यन्तरलोकविभागो नाम
नवमं प्रकरणं समाप्तम् ॥ ९ ॥

व्यन्तरोंमें गणिकामहत्तरोके नाम कहे गये है ॥ ८२ ॥ शर्वरी, सर्वसेना, रुद्रा और रुद्रदर्शना ये राक्षस जातिके व्यन्तरोंमें गणिकाओंके महत्तर होते हैं ॥ ८३ ॥ पुंस्प्रिया, पुंस्कान्ता, सौम्या और पुरुषदर्शिनी ये किंपुरुष व्यन्तरोंके गणिकामहत्तरोंके नाम है ॥ ८४ ॥ भद्रा, सुभद्रा, मालिनी और पद्ममालिनी ये यक्षजातिके देवोमें गणिकाओके महत्तरोंके नाम कहे गये है ॥ ८५ ॥ समस्त गणिकाओके पुर चौरासी हजार (८४०००) योजन विस्तृत कहे जाते हैं ॥ ८६ ॥ पुराणोंके ज्ञाता महर्षि आठों ही व्यन्तरनिकायोंमें गणिकाओंकी स्थिति अर्ध पल्य प्रमाण बतलाते हैं ॥ ८७ ॥ ये व्यन्तर देव दस धनुष ऊंचे होते हैं। वे कुछ अधिक पांच दिनमें आहार करते है तथा उतने ही मुहूर्तोमें निःश्वास लेते हैं ॥ ८८ ॥ ऐशान कल्प तकके सब देव जन्मसे सात हाथ ऊंचे होते है। परन्तु विक्रियासे निर्मित शरीर उनकी इच्छाके अनुसार ऊंचे होते हैं। ज्योतिषी देव सात धनुष प्रमाण ऊंचे होते हैं ॥ ८९ ॥

जो कुमार्गमें स्थित है, दूषित आचरण करनेवाले है, निधानको प्राप्त हैं– सम्पत्तिमें मुग्ध रहते है, विना इच्छाके विषयोंसे विरक्त हैं अर्थात् अकाम निर्जरा करनेवाले हैं तथा जो अग्नि आदिके द्वारा मरणको प्राप्त हुए है; ऐसे प्राणी देवोंकी तीन गतियों (भवनत्रिक) में जन्मको प्राप्त होते हैं। जिन मलिनबुद्धि प्राणियोंने कषाय एवं इन्द्रियरूप घोड़ोंके आक्रमणको मन्द कर दिया है ऐसे प्राणी भी इन देवोंमें उत्पन्न होते हैं [यहां ' मन्द्राक्रान्ता ' पदसे छन्दका नाम भी सूचित कर दिया गया है] ॥ ९० ॥

इस प्रकार लोकविभागमें मध्यम लोकमें व्यन्तरलोकविभाग नामक नौवां प्रकरण
समाप्त हुआ ॥ ९ ॥

---

१ प राक्षसाना । २ ब 'र्गणिनाम' । ३ ब चाहुः । ४ ब 'दथा । ५ आ ब निष्वसन्ति । ६ ब निदान' । ७ प चाकामद्विषय' ।

[दशमो विभागः]

वर्धमानं महावीरं मूर्ध्ना[1] नत्वा कृताञ्जलिः । क्रमवृद्धोर्ध्वसाखाढ्य[2]मूर्ध्वलोकमितो ब्रुवे ॥१
ऊर्ध्वं भावनदेवेभ्यो देवा वानान्तरा स्थिताः । नीचोपपातिकास्तेभ्यस्तेभ्यो दिग्वासिनः सुराः ॥२
ततश्चान्तरवासाख्या वसन्तोऽपि निरन्तरम् । कूष्माण्डाश्च परं तेभ्यस्तत उत्पन्नकाः सुराः ॥३
अनुत्पन्नकनामानस्तत ऊर्ध्वं प्रमाणकाः । गन्धिकाश्च महागन्धा भुजगाः प्रीतिका अपि ॥४
आकाशोत्पन्नका नाम्ना ततो ज्योतिषिका अपि । कल्पोद्भवाः परे तेभ्यस्तेभ्यो वैमानिकाः परे ॥५
आद्या ग्रैवेयकास्तेष्वनुद्दिशानुत्तराः सुराः । द्वितीया तत ऊर्ध्वास्ते सिद्धा ऊर्ध्वं ततः स्थिताः ॥६
हस्तमात्रं भुवो गत्वा देवा नीचोपपातिकाः । दशवर्षसहस्राणि जीवन्तस्तत्र[3] भाषिताः ॥७

। १ । १०००० ।

दशहस्तसहस्राणि तेभ्य ऊर्ध्वमतीत्य च । विंशत्यब्दसहस्राणि जीवन्त्यो नीचदेवताः ॥८

। २०००० ।

दशहस्तसहस्राणि तेभ्यो ह्यूर्ध्वमतीत्य च । त्रिंशदब्दसहस्राणि जीवन्त्यो नीचदेवताः ॥९

। ३०००० ।

दशहस्तसहस्राणि तेभ्य ऊर्ध्वमतीत्य च । चत्वारिंशत्सहस्राणि जीवन्त्यो नीचदेवताः ॥१०

। १०००० । ४०००० ।

मैं हाथ जोड़कर श्रीवर्धमान महावीर अन्तिम तीर्थंकरको शिरसे नमस्कार करता हुआ यहां क्रमसे वृद्धिगत उपरिम शाखाओंसे (?) व्याप्त ऊर्ध्व लोकका वर्णन करता हूं ॥१॥ भवनवासी देवोंसे ऊपर वानव्यन्तर देव, उनसे ऊपर नीचोपपातिक देव, और उनसे ऊपर दिग्वासी देव स्थित है । उनके ऊपर निरन्तर अन्तरवासी देव निवास करते है, उनसे ऊपर कूष्माण्ड देव, उनसे ऊपर उत्पन्नक देव, उनसे ऊपर अनुत्पन्नक नामक देव, उनसे ऊपर प्रमाणक देव, उनसे ऊपर गन्धिक देव, उनसे ऊपर महागन्ध, उनसे ऊपर भुजग, उनसे ऊपर प्रीतिक, उनसे ऊपर आकाशोत्पन्नक नामक देव, उनसे ऊपर ज्योतिषी देव, उनसे ऊपर कल्पवासी देव, और उनसे ऊपर वैमानिक देव स्थित है ॥ २-५ ॥ वैमानिकों (कल्पातीतो) में प्रथम ग्रैवेयक देव और दूसरे अनुदिश एवं अनुत्तर देव हैं जो उनके ऊपर स्थित हैं। उनके ऊपर वे सिद्ध परमात्मा स्थित हैं॥६॥

[चित्रा] पृथिवीसे एक हाथ ऊपर जाकर नीचोपपातिक देव स्थित हैं । उनकी आयु दस हजार वर्ष प्रमाण कही गई है– ऊंचाई १ हाथ, आयु १०००० वर्ष ॥ ७ ॥ उनके ऊपर दस हजार हाथ जाकर बीस हजार वर्ष प्रमाण आयुवाले नीच देव (दिग्वासी) रहते हैं – आयु २०००० वर्ष ॥ ८ ॥ उनके ऊपर दस हजार हाथ जाकर तीस हजार वर्ष तक जीवित रहनेवाले नीच देव (अन्तर निवासी) रहते हैं– आयु ३०००० वर्ष ॥ ९ ॥ उनके ऊपर दस हजार हाथ जाकर चालीस हजार वर्ष तक जीवित रहनेवाले नीच देव (कूष्माण्ड) स्थित हैं– ऊपर हाथ

१ ब मूर्धा । २ ब साख्याढ्य° । ३ प जीवंस्तत्र ।

विंशतिं तु सहस्राणां हस्तांस्तेभ्यो व्यतीत्य च । पञ्चाशतं सहस्राणि जीवन्त्यन्यास्तु[1] देवताः ॥११
। २०००० । ५०००० ।
[2]तावत्तावद् व्यतीत्यान्याः[3] षष्टिसप्तत्यशीति च । चतुरशीतिं सहस्राणि जीवन्त्यः सन्ति देवताः ॥
। ६०००० । ७०००० । [८०००० ।] ८४००० ।
पल्याष्टमायुषस्ताभ्यः पल्यपादायुषस्ततः । पल्योपमदलायुष्कास्ताभ्य[4] ऊर्ध्वमतीत्य च ॥१३
। $\frac{1}{8}$ । $\frac{1}{4}$ । $\frac{1}{2}$ ।
ज्योतिर्देवाः परे तेभ्यः पल्यं जीवन्ति साधिकम् । दशवर्षसहस्राग्रं पल्यं जीवन्ति भास्कराः ॥१४
। प १ व १०००० ।
नियुतेनाधिकं[5] पल्यं चन्द्रा जीवन्ति तत्परे । अयमायुःक्रमो[6] वेद्यो देवस्थानक्रमोऽपि च ॥१५
। प १ व १००००० ।
द्विधा वैमानिका देवा कल्पातीताश्च कल्पजाः । कल्पा द्वादश तत्र स्युः कल्पातीतास्ततः परे ॥१६
सौधर्मः प्रथमः कल्प ऐशानश्च ततः परः । सनत्कुमारमाहेन्द्रौ ब्रह्मलोकोऽथ लान्तवः ॥१७
महाशुक्रः सहस्रार आनतः प्राणतोऽपि च । आरणश्चाच्युतश्चेति एते कल्पा उदाहृताः ॥१८
उक्तं च त्रयम् [त्रि. सा. ४५२-५४] —
सोहम्मीसाणसणक्कुमारमाहिंदगा हु कप्पा हु । बम्हब्बम्हुत्तरगो[7] लांतवकापिट्ठगो छट्ठो ॥१

१०००० , आयु ४०००० वर्ष ॥ १० ॥ उनसे बीस हजार हाथ ऊपर जाकर पचास हजार वर्ष तक जीवित रहनेवाले अन्य (उत्पन्न) देव स्थित है– उपर हाथ २००००, आयु ५००००, वर्ष ॥ ११ ॥ उतने उतने हाथ ऊपर जाकर क्रमसे साठ हजार, सत्तर हजार, अस्सी हजार और चौरासी हजार वर्ष तक जीवित रहनेवाले अन्य (अनुत्पन्न, प्रमाणक, गन्ध, महागन्ध) देव रहते है– आयु ६००००, ७००००, ८००००, ८४००० वर्ष ॥ १२ ॥ उनके ऊपर [उतने हाथ] जाकर पल्यके आठवें भाग प्रमाण आयुवाले, पल्यके चतुर्थ भाग प्रमाण आयुवाले और आधा पल्य प्रमाण आयुवाले (भुजग, प्रीतिक और आकाशोत्पन्न) देव स्थित है– आयु पल्य $\frac{1}{8}$, पल्य $\frac{1}{4}$, पल्य $\frac{1}{2}$ ॥ १३ ॥

उनके ऊपर ज्योतिषी देव रहते है जो कुछ अधिक पल्य प्रमाण काल तक जीवित रहते हैं। सूर्य ज्योतिषी देव दस हजार वर्षसे अधिक एक पल्य प्रमाण काल तक जीवित रहते हैं– आयु १ पल्य और १०००० वर्ष ॥ १४ ॥ उनके ऊपर चन्द्र एक लाख वर्षसे अधिक एक पल्य काल तक जीवित रहते हैं । इस प्रकार यह आयुका क्रम और देवोके स्थानका क्रम जानना चाहिये – आयु १ पल्य और १००००० वर्ष ॥ १५ ॥

वैमानिक देव दो प्रकारके हैं– कल्पोत्पन्न और कल्पातीत । उनमें कल्प बारह हैं। उनके आगे कल्पातीत हैं ॥ १६ ॥ प्रथम कल्प सौधर्म, तत्पश्चात् दूसरा ऐशान, सनत्कुमार, माहेन्द्र, ब्रह्मलोक, लान्तव, महाशुक्र, सहस्रार, आनत, प्राणत, आरण और अच्युत; ये बारह कल्प कहे गये हैं ॥ १७-१८ ॥ इस सम्बधमें ये तीन गाथाये भी कही गई हैं—

सौधर्म, ईशान, सनत्कुमार, माहेन्द्र, ब्रह्म-ब्रह्मोत्तर, छठा लान्तव-कापिष्ठ, शुक्र-महाशुक्र

१ प जीवन्त्यान्यास्तु° । २ प श्लोकस्यास्य पूर्वार्द्धभागो नास्ति । ३ आ व्यतीतान्याः । ४ प °युष्कस्ताभ्य । ५ ब °नादिकं । ६ ब क्रमा । ७ आ प बम्हं बम्हु° ब बम्हां बम्हु° । (त्रि सा बम्हब्बम्हु°) ।

सुक्कमहासुक्कगदो सदरसहस्सारगो दु तत्तो दु । आणदपाणदआरणअच्चुदगा होंति कप्पा हु ॥२
मज्झिमचउजुगलाणं पुव्वावरजुम्मगेसु सेसेसु । सव्वत्थ होंति इंदा इदि बारस[1] होंति कप्पा हु ॥
ग्रैवेयकानि च त्रीणि अधोमध्योत्तमानि तु । एकैकं च त्रिधा भिन्नमूर्ध्वमध्याधराख्यया ॥१९
अनुदिग्नामकान्यूर्ध्वं ततोऽनुत्तरकाणि च । ऊर्ध्वलोकविभागोऽयमीषत्प्राग्भारकान्तिमः[2] ॥ २०
विमानानां च लक्षाणि चतुरशीतिर्भवन्ति च । सप्तनवतिसहस्राणि त्रयोविंशतिरत्र च ॥२१

। ८४९७०२३ ।

इन्द्रकाणि त्रिषष्टिः स्युरूर्ध्वपङ्क्त्या स्थितानि च । पटलानां च मध्यानि त्रिषष्टिः पटलान्यतः ॥

। ६३ । ६३ ।

त्रिंशदेकाधिका सप्तचतुर्द्व्येकैकषट्त्रिकम् । त्रिकत्रिकैकैकानि स्युरूर्ध्वलोकेन्द्रकाणि तु ॥२३

। ३१ । ७ । ४ । २ । १ । १ । ६ । ३ । ३ । ३ । १ । १ ।

ऋतुरादीन्द्रकं प्रोक्तं त्रिषष्टिस्तस्य दिक्षु च । श्रेणीबद्धविमानानि एकैकोनानि चोत्तरम् ॥२४

। ६३ ।

उक्तं च त्रयम् [ति. प. ८, ८३-८४,१०९]–

शतार-सहस्रार, आनत, प्राणत, आरण और अच्युत ये कल्प है। इनमे मध्यम चार युगलोंके पूर्व दो युगलोंमे अर्थात् ब्रह्म और लान्तवमें तथा अपर युगलों अर्थात् महाशुक्र और सहस्रारमें एक एक इन्द्र और शेष चार युगलोमे सर्वत्र एक एक इन्द्र है। इस प्रकार बारह कल्प होते हैं ॥ १-३ ॥

ग्रैवेयक तीन हैं— अधो ग्रैवेयक, मध्यम ग्रैवेयक और उत्तम ग्रैवेयक। इनमेंसे प्रत्येक भी ऊर्ध्व, मध्य और अधरके नामसे तीन प्रकारका है ॥ १९ ॥ इनके ऊपर अनुदिश नामक विमान और उनके भी ऊपर अनुत्तर विमान है। अन्तमें ईषत्प्राग्भार पृथिवी है। यह ऊर्ध्व लोकका विभाग है ॥ २० ॥ यहाँ सब विमान चौरासी लाख संतानबं हजार तेईस है – ८४९७०२३ ॥ २१ ॥ पटल तिरेसठ (६३) हैं जो ऊर्ध्व-पंक्तिके क्रमसे स्थित हैं। इन पटलोके मध्यमें तिरेसठ (६३) इन्द्रक विमान स्थित है॥ २२ ॥ एक अधिक तीस अर्थात् इकतीस, सात, चार, दो, एक, एक, छह, तीन, तीन, तीन, एक और एक; इस प्रकार क्रमसे ऊर्ध्व लोकगत उन बारह स्थानोंमे इतने इन्द्रक स्थित है— ३१, ७, ४, २, १, १, ६, ३, ३, ३, १, १ ॥ २३ ॥ उनमें जो प्रथम ऋतु इन्द्रक कहा गया है उसकी पूर्वादिक दिशाओंमे तिरेसठ तिरेसठ (६३-६३) श्रेणीबद्ध विमान स्थित हैं। इसके आगे वे उत्तरोत्तर एक एक कम (६२, ६१ आदि) हैं ॥२४॥ इस सम्बन्धमें तीन गाथायें भी कही गई हैं—

१ ब बारह। २ प कांतिभिः।

उडुणामे पत्तेक्कं सेढिगवा चउदिसासु बासट्ठी । एक्केक्कूणा सेसे पडिदिसमाइच्चपरियंतं[1] ॥४
उडुणामे सेढिगवा[2] एक्केक्कदिसाए होंति तेसट्ठी । एक्केक्कूणा सेसे जाव य सव्वत्थसिद्धि त्ति[3] ॥५
सेढीबद्धे सव्वे समवट्टा विविहदिव्वरयणमया । उल्लसिदधयवडाया णिरुवमरूवा विराजंति ॥६
ऋतुश्चन्द्रोऽथ विमलो वल्गुवीरमथारुणम् । नन्दनं नलिनं चैव काञ्चनं रोहितं तथा ॥२५
चञ्चं च मरुतं भूयः ऋद्धीशं च त्रयोदशम् । वैडूर्यं रुचकं चापि रुचिराङ्के च नामतः ॥२६
स्फटिकं तपनीयं च मेघमभ्रमतः परम् । हारिद्रं पद्मसंज्ञं च लोहिताख्यं सवज्रकम् ॥२७
नन्द्यावर्तविमानं च प्रभाकरमतः परम् । पृष्ठकं[4] गजमित्रे च प्रभा चाद्योऽस्तु कल्पयोः ॥२८
अञ्जनं वनमालं च नागं गरुडमित्यपि । लांगलं बलभद्रं च चक्रं च परयोरपि ॥२९
अरिष्टं देवसमिति ब्रह्मं ब्रह्मोत्तराह्वयम् । ब्रह्मलोके च चत्वारि इन्द्रकाणीति लक्षयेत् ॥३०
नाम्ना तु ब्रह्महृदयं लान्तवं चेति तद्द्वयम्[5] । लान्तवे शुक्रसंज्ञं च महाशुक्रेऽभिधीयते ॥३१
शताराख्यं सहस्रारे आनतं प्राणतं तथा । पुष्पकं शातकारं च आरणं चाच्युतं च षट् ॥३२
आनतादिचतुष्के च ग्रैवेयेषु सुदर्शनम् । अमोघं सुप्रबुद्धं च अधस्ताद्वर्णितं त्रयम् ॥३३
यशोधरं सुभद्रं च सुविशालं च मध्यमे । सुमनः सौमनस्यं च ऊर्ध्वे प्रीतिकरं च तत् ॥३४
अनुदिग्मध्यमादित्यं मध्यं चानुत्तरेष्विति । सर्वार्थसिद्धिसंज्ञं च सर्वान्त्यप्रतरेन्द्रकम् ॥३५

ऋतु नामक इन्द्रक विमानकी चारों दिशाओंमेंसे प्रत्येक दिशामें बासठ श्रेणीबद्ध विमान स्थित हैं। आगे आदित्य इन्द्रक पर्यन्त शेष इन्द्रकोंकी पूर्वादिक दिशाओंमें स्थित वे श्रेणीबद्ध विमान उत्तरोत्तर एक एक कम होते गये हैं ॥४॥ ऋतु इन्द्रक विमानकी एक एक दिशामें तिरेसठ श्रेणीबद्ध विमान हैं। आगे सर्वार्थसिद्धि पर्यन्त शेष इन्द्रकोंमें वे उत्तरोत्तर एक एक कम है [पाठान्तर]॥ ५ ॥ गोल, अनेक प्रकारके दिव्य रत्नोंसे निर्मित और ध्वजा-पताओंसे सुशोभित वे सब श्रेणीबद्ध विमान अनुपम स्वरूपको धारण करते हुए सुशोभित होते हैं ॥ ६ ॥

ऋतु, चन्द्र, विमल, वल्गु, वीर, अरुण नन्दन, नलिन, कांचन, रोहित, चंच, मरुत, तेरहवां ऋद्धीश, वैडूर्य, रुचक, रुचिर, अंक, स्फटिक, तपनीय, मेघ, अभ्र, हारिद्र, पद्म, लोहित, वज्र, नन्द्यावर्त, प्रभाकर, पृष्ठक, गज, मित्र और प्रभा ये इकतीस इन्द्रक प्रथम दो कल्पों (सौधर्म-ऐशान) में अवस्थित हैं ॥ २५-२८ ॥ अंजन, वनमाल, नाग, गरुड, लांगल, बलभद्र और चक्र ये सात इन्द्रक विमान आगेके दो कल्पों (सनत्कुमार-माहेन्द्र) में अवस्थित है ॥२९॥ अरिष्ट, देवसमिति, ब्रह्म और ब्रह्मोत्तर नामक चार इन्द्रक विमान ब्रह्म कल्पमें जानना चाहिये ॥ ३० ॥ ब्रह्महृदय और लान्तव नामक दो इन्द्रक विमान लान्तव कल्पमें हैं। महाशुक्र कल्पमें एक शुक्र नामका विमान कहा जाता है ॥ ३१ ॥ शतार नामका एक इन्द्रक विमान सहस्रार कल्पमें तथा आनत, प्राणत, पुष्पक, शातकार, आरण और अच्युत ये छह इन्द्रक विमान आनत आदि चार कल्पोंमें हैं। ग्रैवेयकोंमें सुदर्शन, अमोघ और सुप्रबुद्ध ये तीन इन्द्रक विमान नीचे; यशोधर, सुभद्र और सुविशाल ये तीन मध्यमें; तथा सुमनस्, सौमनस्य और प्रीतिंकर ये तीन इन्द्रक विमान ऊपर स्थित हैं ॥ ३२-३४ ॥ अनुदिशोंके मध्यमें आदित्य तथा अनुत्तरोंके मध्यमें सर्वार्थसिद्धि नामका सबमें अन्तिम इन्द्रक पटल है ॥ ३५ ॥

१ आ प माइंच° । २ ब °गया । ३ ब स्थि । ४ आ प पृष्टकं प षष्टकं । ५ आ प तद्वयं ।

ये च षोडश कल्पांश्च केचिदिच्छन्ति तन्मते । तस्मिंस्तस्मिन् विमानानां परिमाणं वदाम्यहम् ॥
[1]द्वात्रिंशन्नियुतान्याद्ये[2] विमानगणना भवेत् । अष्टाविंशतिरैशाने तृतीये द्वादशापि च ॥३७
। ३२००००० । २८००००० । १२००००० ।
माहेन्द्रे नियुतान्यष्टौ षण्णवत्यधिकं द्वयम् । ब्रह्मे ब्रह्मोत्तरे चापि चतुष्कं स्यात्तदूनकम् ॥३८
। ८००००० । २०००९६ । १९९९०४ ।
द्विचत्वारिंशदग्रं च पञ्चविंशतिसहस्रकम् । लान्तवे तैः सहस्राणि पञ्चाशत् विना परे ॥३९
। २५०४२ । २४९५८ ।
विंशतिः स्युः सहस्राणि शुक्रे शुद्धा च विंशतिः । चत्वारिंशत्सहस्राणि महाशुक्रे तु तैर्विना ॥४०
। २००२० । १९९८० ।
शतारे त्रिसहस्रं स्यादेकोनापि च विंशतिः । एकाशीतिः सहस्रारे शतानां त्रिंशदेकहा ॥४१
। ३०१९ । १९८१ [२९८१] ।
चत्वारिंशानि चत्वारि शतान्यानतयुग्मके । द्वे शते षष्टिसंयुक्ते[3] आरणाच्युतयुग्मके ॥४२
। ४४० । २६० ।
चतुःशतानि शुद्धानि आनतप्राणतद्विके । आरणाच्युतयुग्मे च त्रिशतान्यपरे विदुः ॥४३
। ४०० । ३०० ।
एकादशं शतं चाद्ये शतं सप्त च मध्यमे । एकाग्रनवतिश्चोर्ध्वे अनुदिक्षु नवैव च ॥४४
। १११ । १०७ । ९ (?) । ९१ । ९ ।

जो कितने ही आचार्य सोलह कल्पोंको स्वीकार करते हैं उनके मतानुसार मैं उस उस कल्पमें (प्रत्येक कल्पमें) विमानोंके प्रमाणको कहता हूं ॥ ३६ ॥ उक्त विमानोंकी संख्या प्रथम कल्पमें बत्तीस लाख (३२०००००), ऐशान कल्पमें अट्ठाईस लाख (२८०००००), तृतीय सनत्कुमार कल्पमें बारह लाख (१२०००००), माहेन्द्र कल्पमें आठ लाख (८०००००), ब्रह्म कल्पमें छ्यानबैसे अधिक दो लाख (२०००९६), ब्रह्मोत्तर कल्पमे उससे (२०००९६) हीन चार लाख (४०००००–२०००९६=१९९९०४), लान्तव कल्पमें ब्यालीस अधिक पच्चीस हजार (२५०४२), आगेके कापिष्ठ कल्पमें इनके विना पचास हजार अर्थात् चौबीस हजार नौ सौ अट्ठावन (५००००–२५०४२=२४९५८), शुक्र कल्पमे बीस हजार बीस (२००२०), महाशुक्रमें उनके विना चालीस हजार अर्थात् उन्नीस हजार नौ सौ अस्सी (४००००–२००२० =१९९८०), शतारमें तीन हजार उन्नीस (३०१९), सहस्रारमें एक कम तीस सौ इक्यासी, (२९८१), आनतयुगलमें चार सौ चालीस (४४०), और आरण-अच्युत युगलमें दो सौ साठ (२६०) हैं ॥ ३७-४२ ॥ मतान्तर—

आनत और प्राणत इन दो कल्पोंमें शुद्ध चार सौ (४००) तथा आरण-अच्युत युगलमें शुद्ध तीन सौ (३००) विमान हैं, ऐसा दूसरे आचार्य कहते हैं ॥ ४३ ॥

उक्त विमानोंकी संख्या प्रथम ग्रैवेयकमें एक सौ ग्यारह (१११), मध्यम ग्रैवेयकमें एक सौ सात (१०७), उपरिम ग्रैवेयकमें इक्यानबै (९१), अनुदिशोंमें नौ ही (९) तथा

१ ब द्वात्रिंशा° । २ आ प 'युतानाद्ये । ३ आ प षष्ठि° ।

अनुत्तरेषु पञ्चैव विमानगणना इमे । इत ऊर्ध्वं प्रवक्ष्यामि तेषां संख्येयकादिकम् ॥४५
अर्चिश्च मालिनी चैव वैरं वैरोचनाख्यकम् । सोमं सोमप्रभं चाङ्कं स्फटिकादित्यनामकम् ॥४६
अर्चिर्वैरोचनाख्यं च अर्चिमालिन्यपि क्रमात् । प्रभासापि च पूर्वाद्या आदित्यस्य चतुर्दिशम् ॥ ४७
विजयं वैजयन्तं च जयन्तमपराजितम् । सर्वार्थसिद्धिसंज्ञस्य विमानस्य चतुर्दिशम् ॥४८
चतुःशून्याब्धिषट्कं[1] च आद्ये संख्येयविस्तृताः[2] । विमानाश्च परे शून्यचतुष्कं शून्यषट्ककम्[3] ॥४९
। ६४०००० । ५६०००० ।
चत्वारिंशत्सहस्राणि तृतीये नियुतद्वयम् । षष्टिश्चैव[4] सहस्राणि माहेन्द्रे नियुतं तथा ॥५०
। २४०००० । १६०००० ।
संख्येयविस्तृता ब्रह्मयुग्मेऽशीतिसहस्रकम् । दशैव च सहस्राणि विज्ञेया लान्तवद्वये ॥५१
। ८००० । १०००० ।
शुक्रद्वये सहस्राणि अष्टौ संख्येयविस्तृताः । द्वादशैव शतानि स्युः शतारद्वितये पुनः ॥५२
। ८०००० । १२०० ।
चत्वारिंशं शतं विद्यादानतादिचतुष्टये । चतुर्गुणास्तु संख्येयाः सर्वत्रासंख्यविस्तृताः ॥५३

असंख्यविस्तृतविमानाः । सौ २५६०००० । ऐ २२४०००० । स ९६०००० । मा ६४०००० । ब्रह्मयुग्मे ३२०००० । लान्तवद्वये ४०००० । शुक्रद्वये ३२००० । शतारद्वितये ४८०० । आनतादिचतुष्के ५६० ।

अनुत्तरोंमें पांच (५) ही हैं। इस प्रकार यहां तक यह विमानोंकी संख्या निर्दिष्ट की गई है । इसके आगे उन विमानोंका संख्येय विस्तार आदि कहा जाता है ॥ ४४-४५ ॥ अर्ची, मालिनी (अर्चिमालिनी), वैर, वैरोचन, सोम, सोमप्रभ, अंक, स्फटिक और आदित्य ये नौ अनुदिश विमान हैं ॥ ४६ ॥ इनमें अर्ची, वैरोचन, अर्चिमालिनी और प्रभासा (वैर) ये चार श्रेणीबद्ध विमान आदित्य इन्द्रकके पूर्वादिक चार दिशाओंमें स्थित हैं ॥ ४७ ॥ विजय, वैजयन्त, जयन्त और अपराजित ये चार विमान सर्वार्थसिद्धि नामक इन्द्रक विमानकी चारों दिशाओंमें स्थित हैं ॥ ४८ ॥

संख्यात योजन विस्तारवाले विमान प्रथम कल्पमें चार शून्य, समुद्र अर्थात् चार और छह (६४००००) इतने अर्थात् छह लाख चालीस हजार तथा आगेके ऐशान कल्पमें चार शून्य, छह और [पांच] (५६००००) इतने अंकों प्रमाण अर्थात् पांच लाख साठ हजार है ॥ ४९ ॥ उक्त संख्यात योजन विस्तारवाले विमान तीसरे कल्पमें दो लाख चालीस हजार (२४००००) तथा माहेन्द्र कल्पमें एक लाख साठ हजार (१६००००) हैं ॥ ५० ॥ संख्यात योजन विस्तारवाले विमान ब्रह्मयुगलमें अस्सी हजार (८००००) तथा लान्तवयुगलमें दस हजार (१००००) ही जानने चाहिये ॥ ५१ ॥ संख्यात विस्तारवाले विमान शुक्रयुगलमें आठ हजार (८०००) तथा शतारयुगलमें बारह सौ (१२००) ही हैं ॥ ५२ ॥ वे विमान आनत आदि चार कल्पोंमें एक सौ चालीस (१४०) जानना चाहिये । उपर्युक्त सब कल्पोंमें असंख्यात योजन विस्तारवाले विमान इन संख्यात विस्तारवाले विमानोंसे चौगुने जानने चाहिये– सौधर्म २५६००००, ऐशान २२४००००, सनत्कुमार ९६००००, माहेन्द्र ६४००००, ब्रह्मयुगल ३२००००, लान्तवयुगल ४००००, शुक्रयुगल ३२०००, शतारयुगल ४८००, आनतादि चार

---

१ ब शून्याब्धि° । २ आ प विस्तृता । ३ ['चतुष्कं षट्कपंचकम्] । ४ आ प षष्ठिश्चैव

कल्पेषु पञ्चमो भागो राशेः संख्येयविस्तृतः । चतुःपञ्चमभागाः स्युरसंख्येयकविस्तृताः ॥५४

शतं चाष्टावसंख्येयास्त्रयः संख्येयविस्तृताः । अगण्या नवतिर्व्येका[1] गण्याश्चाष्टादशोदिताः ॥५५

। १०८ । ८९ । १८ ।

चतुःसप्ततिरूर्ध्वं च असंख्येया उदाहृताः[2] । दश सप्त च संख्येया अष्टौ चासंख्यविस्तृताः ॥५६

। ७४ । १७ । ८ ।

संख्येयमनुदिक्ष्वेकं तथैवानुत्तरेष्वपि । असंख्येयास्तु चत्वार इति सर्वज्ञदर्शनम् ॥५७

। १ । १ ।

शून्याष्टकं त्रिकं चैव नव च स्युः पुनर्नव । षडेकं च क्रमाद् ज्ञेया विमाना गणितागताः ॥५८

। १६९९३८० ।

त्रयश्चत्वारि षट् सप्त नव सप्त षडेव च । असंख्यविस्तृता ज्ञेया विमाना सर्व एव ते ॥५९

। ६७९७६४३ ।

शतमष्टौ सहस्राणि विंशतिः सप्तसंयुता । सर्वाण्यापि विमानानि स्थितान्यावलिकासु वै ॥६०

। ८१२७ ।

चत्वारि च सहस्राणि चत्वार्येव शतानि च । नवतिश्चापि पञ्चाग्रा आदावावलिकास्थिताः ॥६१

। ४४९५ ।

---

५६०. ॥ ५३ ॥ कल्पोंमे अपनी अपनी विमानराशिके पांचवें भाग प्रमाण संख्यात योजन विस्तारवाले तथा चार पांचवे भाग (⁴⁄₅) प्रमाण असख्यात योजन विस्तारवाले है ॥ ५४ ॥

ग्रैवेयकोंमेंसे अधस्तन ग्रैवेयकमें असंख्यात विस्तारवाले विमान एक सौ आठ (१०८) तथा संख्यात विस्तारवाले तीन (३) हैं, मध्यम ग्रैवेयकोंमे एक कम नब्बै (८९) विमान असंख्यात विस्तारवाले तथा अठारह (१८) विमान संख्यात विस्तारवाले है, उपरिम ग्रैवेयकमे चौहत्तर (७४) असंख्यात विस्तारवाले तथा सत्तरह (१७) सख्यात विस्तारवाले विमान कहे गये हैं । अनुदिशोंमे आठ (८) असंख्यात विस्तारवाले विमान तथा एक (१) संख्यात विस्तारवाला है । उसी प्रकारसे अनुत्तरोंमें भी सख्यात विस्तारवाला एक (१) तथा असंख्यात विस्तारवाले चार (४) विमान है, यह सर्वज्ञके द्वारा देखा गया है ॥ ५५-५७ ॥ सब विमानोंमें अंकक्रमसे शून्य, आठ, तीन, नौ, नौ, छह और एक (१६९९३८०) इतने विमान संख्यात विस्तारवाले तथा तीन, चार, छह सात, नौ, सात और छह (६७९७६४३) इतने विमान असंख्यात विस्तारवाले हैं ॥ ५८-५९ ॥

श्रेणियोंमें स्थित (श्रेणीबद्ध) सब विमान आठ हजार एक सौ सत्ताईस (८१२७) हैं ॥ ६० ॥ प्रथम कल्पमें श्रेणीबद्ध विमान चार हजार चार सौ पंचानबै (४४९५) हैं ॥६१॥

विशेषार्थ—प्रथम कल्पयुगलमें इकतीस इन्द्रक विमान हैं । इनमेंसे प्रथम ऋतु इन्द्रककी चारों दिशाओंमेंसे प्रत्येकमें ६३–६३ श्रेणीबद्ध विमान स्थित हैं । आगे दूसरे व तीसरे आदि इन्द्रकोंमें वे उत्तरोत्तर एक एकसे कम (६२, ६१ आदि) होते गये है । इस क्रमसे सौधर्म कल्पमें समस्त (३१) इन्द्रकोंके आश्रित सब श्रेणीबद्ध विमान कितने हैं, यह जाननेके लिये निम्न गणित सूत्रका उपयोग किया जाता है– एक कम गच्छको आधा करके उसे चयसे गुणित

---

१ आ प वैका । २ प असंख्येय उदा० ।

चतुर्दश शतान्येवं अष्टाशीतिश्च तत्परे। षट्शतं षोडशान्यस्मिन् माहेन्द्रे त्र्यधिके शते ॥६२

। १४८८ । ६१६ । २०३ ।

षडशीतिर्द्विशतं ब्रह्मे नवतिश्चतुरुत्तरा। ब्रह्मोत्तरे परस्मिंस्तु पञ्चविंशं शतं भवेत् ॥६३

। २८६ । ९४ । १२५ ।

चत्वारिंशत्पुनः सैका कापिष्ठे शुक्रनामके। अष्टाग्रा खलु पञ्चाशन्महत्येकान्नविंशतिः ॥६४

। ४१ । ५८ । १९ ।

शतारे पञ्चपञ्चाशदष्टादश ततः परे। पञ्चोने द्वे शते चापि बोद्धव्या आनतद्वये ॥६५

। ५५ । १८ । १९५ ।

शतमेकान्नषष्टिश्च आरणाच्युतयुग्मके। त्रयोविंशं शतं विद्यादधस्तात्त्रिःप्रकीर्णकाः[1] ॥६६

। १५९ । १२३ ।

करे। फिर उसको मुखमेंसे कम करके शेषको गच्छसे गुणित करनेपर सर्व संकलित धन प्राप्त होता है। जैसे– प्रकृत सौधर्म कल्पमें एक दिशागत श्रेणीबद्ध ६३ हैं। चूंकि इस कल्पके अधीन पूर्व, पश्चिम और दक्षिण इन तीन दिशागत श्रेणीबद्ध विमान हैं, अत एव इनको तीनसे गुणित करनेपर १८९ मुखका प्रमाण होता हैं; चयका प्रमाण यहां तीन और गच्छ ३१ है। अत एव उक्त सूत्रके अनुसार $\frac{३१-१}{२}$ ×३=४५; (१८९–४५)×३१ = ४४६४; इसमे सौधर्म कल्पके ३१ इन्द्रक विमानोंको मिला देनेपर उपर्युक्त प्रमाण प्राप्त हो जाता है— ४४६४+३१=४४९५. यही क्रम आगेके कल्पोंमें भी समझना चाहिये।

आगे ऐशान कल्पमे चौदह सौ अठासी (१४८८), सनत्कुमार कल्पमे छह सौ सोलह (६१६) तथा माहेन्द्र कल्पमें दो सौ तीन (२०३) श्रेणीबद्ध विमान हैं ॥ ६२ ॥

विशेषार्थ— उपर्युक्त ३१ इन्द्रक विमानोंकी केवल उत्तर दिशागत श्रेणीबद्ध विमान ही इस कल्पके अन्तर्गत है। अत एव यहां मुख ६३ चय १ और गच्छ ३१ है। उक्त प्रक्रियाके अनुसार यहां ऐशान कल्पमे $\frac{३१-१}{२}$ ×१=१५, (६३–१५)× ३१ = १४८८. श्रेणीबद्ध विमानोंका प्रमाण प्राप्त हो जाता हैं। सब (३१) इन्द्रक विमान चूंकि सौधर्म कल्पके अधीन हैं, अत एव उनका प्रमाण यहां नहीं जोड़ा गया है। सनत्कुमार कल्पमें ७ इन्द्रक विमानोमेंसे प्रथम इन्द्रककी प्रत्येक दिशामें ३२ तथा आगे १–१ कम (३१, ३० आदि) श्रेणीबद्ध विमान हैं। अतएव यहां मुखका प्रमाण ३२×३=९६, चय ३ और गच्छ ७ है। अत: $\frac{७-१}{२}$×३=९; (९६–९)×७=६०९; ६०९ + ७ इन्द्रक = ६१६ श्रे. ब.। माहेन्द्र कल्पमे $\frac{७-१}{२}$ = ३; (३२–३)× ७ = २०३ श्रे. ब.।

ब्रह्म कल्पमे दो सौ छयासी (२८६), ब्रह्मोत्तर कल्पमें चौरानबै (९४) और लान्तव कल्पमें एक सौ पच्चीस (१२५) श्रेणीबद्ध विमान हैं ॥ ६३ ॥ ब्रह्म $\frac{४-१}{२}$ ×३=४$\frac{१}{२}$, (२५×३)–४$\frac{१}{२}$,=७०$\frac{१}{२}$; ७०$\frac{१}{२}$×४+४ इ. वि. =२८६ श्रेणीबद्ध। ब्रह्मोत्तर $\frac{४-१}{२}$; २५–$\frac{४-१}{२}$ ×४=९४ श्रेणीबद्ध। लान्तव (२१×३)+(२०×३) + २ इ. वि. =१२५ श्रेणीबद्ध।

कापिष्ठ कल्पमें इकतालीस (४१), शुक्रमें अट्ठावन (५८) और महाशुक्रमें उन्नीस श्रेणीबद्ध विमान हैं ॥ ६४ ॥ शतार कल्पमे पचपन (५५), सहस्रारमें अठारह (१८) और आनतयुगलमें पांच कम दो सौ (१९५) श्रेणीबद्ध विमान हैं ॥ ६५ ॥ आरण और अच्युत युगलमें एक सौ उनसठ (१५९) तथा अधो ग्रैवेयकमें एक सौ तेईस (१२३) प्रकीर्णकरहित

[1] ब निष्प्रकीर्णकाः।

सप्ताग्रा मध्यमेऽशीतिरेकपञ्चाशदुत्तरे । अनुदिक्षु नवैव स्युः पञ्चैवानुत्तरेषु च ॥६७

। ८७ । ५१ । ९ । ५ ।

ऋतुर्नृक्षेत्रविस्तारश्चरमो जम्बूसमस्तयोः । विशेषे रूपहीनेन्द्रकाप्ते हानिवृद्धिके ॥६८

। ४५००००० । १००००० । हानिवृद्धि ७०९६७ । $\frac{२}{३}\frac{३}{१}$ ।

एकत्रिंशद्विमानानि श्रेणीषु चतसृष्वपि । स्वयम्भूजलधेरूर्ध्वं शेषा द्वीपाम्बुधित्रये ॥६९

। ३१ । १६ । ८ । ४ । २ । १ । १ ।

चन्द्रे विमलवल्ग्वोश्च श्रेण्यर्धार्धं तथा परे । चूलिकां वालमात्रेण ऋतुर्न प्राप्य तिष्ठति ॥७०

जलप्रतिष्ठिता आद्योः परयोर्वातप्रतिष्ठिताः । आ सहस्रारतो [1]ब्रह्माज्जलवातप्रतिष्ठिताः ॥७१

आनतादिविमानाश्च शुद्धाकाशे प्रतिष्ठिताः । अयं प्रतिष्ठानियमः सिद्धो लोकानुभावतः ॥७२

एकविंशशतं[2] चैकं सहस्रं च घनो द्वयोः । एकोनशतहीनं च बहला परयोर्द्वयोः ॥७३

। ११२१ । १०२२ ।

ब्रह्मे च लान्तवे शुक्रे शतारयुगलेऽपि च । आनतादिचतुष्के च अधस्तान्मध्यमे परे ॥७४

(श्रेणीबद्ध) विमान जानना चाहिये ॥ ६६ ॥ मध्यम ग्रैवेयकमें सतासी (८७), उपरिम ग्रैवेयकमें इक्यावन (५१), अनुदिशोमे नौ (९) तथा अनुत्तरोमे पाच (५) ही श्रेणीबद्ध विमान हैं ॥ ६७ ॥

ऋतु इन्द्रकका विस्तार मनुष्यक्षेत्रके बराबर पैंतालीस लाख तथा अन्तिम सर्वार्थसिद्धि इन्द्रकका विस्तार जम्बूद्वीपके प्रमाण एक लाख योजन है। उन दोनोको परस्पर घटाकर शेषमें एक कम इन्द्रकप्रमाणका भाग देनेपर हानि-वृद्धिका प्रमाण प्राप्त होता है ॥ ६८ ॥ यथा— $\frac{४५००००० - १०००००}{६३ - १}$ = ७०९६७$\frac{२}{३}\frac{३}{१}$ यो.हा. वृ ।

चारों ही श्रेणियोंमें स्थित तिरेसठ तिरेसठ श्रेणीबद्ध विमानोमें इकतीस विमान स्वयम्भूरमण समुद्रके ऊपर तथा शेष बत्तीस विमान तीन द्वीपों और तीन समुद्रोंमें (स्वयम्भूरमण द्वीपमें १६, अहीन्द्रवर समुद्रमें ८, अहीन्द्रवर द्वीपमे ४, देववर समुद्रमें २, देववर द्वीपमे १ और यक्षवर समुद्रमें १ = ३२ स्थित हैं ॥ ६९ ॥ विमल, चन्द्र और वल्गु इद्रक विमानोंके आधे आधे श्रेणीबद्ध विमान अनन्तर द्वीपो व समुद्रोंमे स्थित हैं (?) । ऋतु विमान मेरु पर्वतकी चूलिकाको बाल मात्रसे न पाकर (बाल प्रमाण अन्तरसे) स्थित है ॥ ७० ॥ प्रथम दो कल्पोके विमान जलके ऊपर स्थित हैं, आगेके दो कल्पोके विमान वायुके ऊपर स्थित हैं, तथा ब्रह्म कल्पसे लेकर सहस्रार कल्प तक आठ कल्पोंके विमान जल-वायुके ऊपर स्थित हैं । आनत आदि कल्पोंके विमान तथा कल्पातीत विमान शुद्ध आकाशमें स्थित है। यह विमानोंके अवस्थानका क्रम लोकानुयोगसे सिद्ध है ॥ ७१-७२ ॥

विमानतलका बाहल्य सौधर्म और ऐशान इन दो कल्पोंमें एक हजार एक सौ इक्कीस (११२१), तथा आगेके दो कल्पोंमें वह विमानतलबाहल्य निन्यानबे योजनसे हीन (११२१ −९९ = १०२२) है ॥ ७३ ॥ ब्रह्म, लान्तव, शुक्र, शतारयुगल, आनत आदि चार, अधो ग्रैवेयक, मध्यम ग्रैवेयक और उपरिम ग्रैवेयकमें वह विमानतलबाहल्य परस्पर क्रमशः उतने

१ आ प ब्रह्माज्वल° : २ आ प एकविंसतं ।

तावदेव क्रमाद्धीना बाहल्येन परस्परात् । एकत्रिंशं शतं चन्द्राः परस्मिन् पटलद्वये ॥७५

। ९२३ । ८२४ । ७२५ । ६२६ । ५२७ । ४२८ । ३२९ । २३० । १३१ ।

प्रासादा षट्छतोच्छ्राया योजनैः पूर्वकल्पयोः । ततः पञ्चशतोच्छ्रायाः परयोः कल्पयोर्द्वयोः ॥७६

। ६०० । ५०० ।

ब्रह्मे च लान्तवे शुक्रे शतारे चानतादिषु । आद्ये मध्ये तथोर्ध्वे च शतार्धोनाः परस्परात् ॥७७

। ४५० । ४०० । ३५० । ३०० । २५० । २०० । १५० । १०० ।

प्रासादा ह्यनुदिक्ष्वत्र दृष्टाः पञ्चाशदुच्छ्रयाः । अनुत्तरेषु विज्ञेयाः पञ्चविंशतिमुच्छ्रिताः[1] ॥७८

। ५० । २५ ।

आद्ययोः पञ्चवर्णास्ते कृष्णवर्ज्याः परद्वये । परयोर्नीलवर्ज्याश्च ब्रह्मलान्तवयोरपि ॥७९
रक्तवर्ज्याश्च शुक्राख्ये सहस्रारे च भाषिताः । परतः पाण्डरा एव विमाना शङ्खसंनिभाः ॥८०
व्रजन्ति तापसोत्कृष्टा आ ज्योतिषविमानतः । चरकाः सपरिव्राजा गच्छन्त्या ब्रह्मलोकतः ॥८१
[2]अकामनिर्जरातप्तास्तिर्यक्पञ्चेन्द्रियाः पुनः । अन्यपाषण्डिनश्चापि[3] आ सहस्रारतोऽधिकाः ॥८२
आऽच्युताच्छ्रावका यान्ति उत्कृष्टाऽऽजीवका अपि । स्त्रियः सम्यक्त्वयुक्ताश्च सच्चारित्रविभूषिताः ॥

---

(९९) से ही उत्तरोत्तर हीन है । आगेके दो पटलोंमें वह बाहल्य एक सौ इकतीस योजन मात्र है ॥ ७४-७५ ॥

जैसे– ब्रह्म ९२३, लान्तव ८२४, शुक्र ७२५, शतारयुगल ६२६, आनतादि चार ५२७, अधो ग्रै. ४२८, मध्यम ग्रै. ३२९, उपरिम ग्रै. २३०, अनुदिश व अनुत्तर १३१ यो. ।

पूर्व दो कल्पोंमें स्थित प्रासाद छह सौ योजन और आगे दो कल्पोंमें पांच सौ योजन ऊंचे हैं– सौ. ऐ. ६०० यो., स. मा. ५०० यो. ॥ ७६ ॥ ये प्रासाद ब्रह्म, लान्तव, शुक्र, शतार, आनतादि चार, अधो ग्रैवेयक, मध्यम ग्रैवेयक और उपरिम ग्रैवेयकमें उत्तरोत्तर पचास योजनसे हीन हैं । यथा– ब्रह्म ४५०, लान्तव ४००, शुक्र ३५०, शतार ३००, आनतादि २५०, अ. ग्रै. २००, म. ग्रै. १५०, उ. ग्रै. १०० यो. ॥ ७७ ॥ यहां अनुदिशोंमें स्थित वे प्रासाद पचास (५०) योजन और अनुत्तरोंमें पच्चीस (२५) योजन मात्र ऊंचे जानने चहिये ॥ ७८ ॥

प्रथम दो कल्पोंमें स्थित विमान पांचों वर्णवाले, आगेके दो कल्पोंमें कृष्ण वर्णको छोडकर चार वर्णवाले, उसके आगे ब्रह्म और लान्तव इन दो कल्पोंमें कृष्ण और नील वर्णसे रहित तीन वर्णवाले, शुक्र और सहस्रार कल्पोंमें लालको भी छोडकर दो वर्णवाले तथा इसके आगे सब विमान शंखके सदृश धवल वर्णवाले ही हैं ॥ ७९-८० ॥

उत्कृष्ट तापस ज्योतिष विमानों तक जाते हैं, अर्थात् वे भवनवासी, व्यन्तर और ज्योतिषी देवोंमें उत्पन्न होते हैं । नग्न अण्डलक्षण चरक और परिव्राजक (एकदण्डी व त्रिदण्डी आदि) ब्रह्मलोक तक जाते हैं ॥ ८१ ॥ अकामनिर्जरासे सन्तप्त पंचेन्द्रिय तिर्यंच तथा दूसरे पाखण्डी तपस्वी भी अधिकसे अधिक सहस्रार कल्प तक जाते हैं ॥ ८२ ॥ श्रावक, उत्कृष्ट आजीवक (कंजिकादिभोजी) तथा सम्यग्दर्शनसे संयुक्त व चारित्रसे विभूषित स्त्रियां अच्युत

---

१ आ प विंशतिरुच्छ्रिताः । २ आ प आकाम । ३ प पाखण्डिन° ।

निर्ग्रन्थाः शुद्धचारित्रा ज्ञानसम्यक्त्वभूषणाः । [1]जातरूपधराः शूरा गच्छन्ति च ततः परम् ॥८४
आ ग्रैवेयाद् व्रजन्तीति मिथ्यादर्शनिनो मताः[2] । ऊर्ध्वं सद्दर्शनास्तेभ्यः संयमस्था नरोत्तमाः ॥८५
निर्ग्रन्था निरहंकारा विमुक्तमदमत्सराः । निर्मोहा निर्विकाराश्च ज्ञानध्यानपरायणाः ॥८६
हत्वा कर्मरिपून् धीराः शुक्लध्यानासिधारया । मोक्षमक्षयसौख्याढ्यं व्रजन्ति पुरुषोत्तमाः ॥८७
पञ्च कल्पान् विहायाद्यान् कृत्स्नपूर्वधरोद्भवः । दशपूर्वधराः कल्पान् व्रजन्त्यूर्ध्वं च संयताः ॥८८
पञ्चेन्द्रियतिरश्चोऽपि आ सहस्रारतः सुराः । स्थावरानपि चैशानात् परतो यान्ति मानुषान् ॥८९
सौधर्माद्यास्तु चत्वारः अष्टौ ब्रह्मादयोऽपि च । प्राणतश्चाच्युतश्चेति चिह्नवन्तश्चतुर्दश[3] ॥९०
वराहो मुकुटे चिह्नं मृगो महिषमीनवत् । कूर्मदर्दुरसप्तीभाश्चन्द्रः सर्पोऽथ खड्गकः ॥९१
छागलो वृषभश्चैव [4]विटपीन्द्रस्तथाच्युतात् । क्रमेण चिह्नानीन्द्राणां प्रोक्तान्येवं चतुर्दश ॥९२
इन्द्रकात्तु प्रभासंज्ञाद् दक्षिणावलिकास्थितम्[5] । अष्टादशविमानं तत् सौधर्मो यत्र देवराट् ॥९३

कल्प तक जाती हैं ॥ ८३ ॥ निर्मल चारित्रसे संयुक्त, सम्यग्ज्ञान व सम्यग्दर्शनसे विभूषित तथा दिगम्बर रूपको धारण करनेवाले ऐसे शूर वीर निर्ग्रन्थ साधु अच्युत कल्पसे आगे अर्थात् कल्पातीत विमानोंमें जाते हैं ॥८४॥ मिथ्यादृष्टि (द्रव्यलिंगी मुनि) मरकर ग्रैवेयक पर्यन्त तथा मनुष्योंमें श्रेष्ठ सम्यग्दृष्टि संयमी मुनि उससे आगे अनुदिश व अनुत्तर विमानोंमें जाते है ॥ ८५॥ मनुष्योंमें श्रेष्ठ जो धीर वीर साधु अहंकार, मद, मात्सर्य, मोह एवं क्रोधादि विकारोंसे रहित होकर ज्ञान और ध्यानमें तत्पर होते है वे महात्मा शुक्लध्यानरूप तलवारकी धारसे कर्मरूप शत्रुओंको नष्ट करके अविनश्वर सुखसे संपन्न मोक्षको प्राप्त करते हैं ॥ ८६-८७ ॥ समस्त (चौदह) पूर्वोंके धारक प्रथम पाच कल्पोंको छोड़कर आगेके देवोंमें उत्पन्न होते हैं। दस पूर्वोंके धारक कल्पोंमें और संयत उसके आगे जाते हैं ॥ ८८॥

सहस्रार कल्प तकके देव पचेन्द्रिय तिर्यंच तक होते हैं। ऐशान कल्प तकके देव स्थावर भी होते हैं। किन्तु आगेके देव मनुष्य ही होते हैं ॥ ८९ ॥

विशेषार्थ— अभिप्राय यह है कि भवनवासी, व्यन्तर, ज्योतिषी और सौधर्म-ऐशान कल्पोंके देव वहांसे च्युत होकर परिणामोंके अनुसार एकेन्द्रियों (पृथिवीकायिक, जलकायिक और प्रत्येक वनस्पति), कर्मभूमिज पंचेन्द्रिय तिर्यं ो और मनुष्योंमें भी उत्पन्न हो सकते हैं। इससे आगे सहस्रार कल्प तकके देव मरकरके पचेन्द्रिय तिर्यंचों और मनुष्योंमे उत्पन्न होते है। इससे ऊपरके देव केवल मनुष्योंमें ही उत्पन्न होते है।

सौधर्म आदि चार, ब्रह्म आदि आठ, प्राणत और अच्युत इन कल्पोमे इन्द्रोंके मुकुटमें क्रमसे ये चौदह चिह्न होते हैं— वराह, मृग, भेस, मछली, कछवा, मेंढक, घोड़ा, हाथी, चन्द्र, सर्प, खड्ग, छागल (बकरी), बैल और विटपीन्द्र (कल्पवृक्ष)। इस प्रकार अच्युत कल्प तक ये क्रमसे इन्द्रोके चौदह चिह्न कहे गये हैं ॥ ९०-९२ ॥

प्रभ नामक इन्द्रकसे दक्षिण श्रेणीमें स्थित जो अठारहवां श्रेणीबद्ध विमान है उसमें

१ ब ज्ञात° । २ [मृताः]। ३ प चिन्हवन्त्यचतु° । ४ आ ब वटपीन्द्र° । ५ आ प संज्ञादक्षिणा° ।

सहस्राण्यामशीतिं च चत्वार्येव च विस्तृतम् । नगरं तत्र शक्रस्य हेमप्राकारसंवृतम् ॥९४

। ८४००० ।

क्वचिद्दोलाध्वजैश्चित्रैश्चक्रान्दोलनपङि‍क्तभिः । क्वचिन्मयूरयन्त्राढचै[ढ्यै]र्भ्राजन्ते शालकोटयः ॥९५

शतार्धमवगाढो गां तावदेव च विस्तृतः । प्राकारस्त्रिशतोच्छ्रायः प्राक्चतुःशतगोपुरम् ॥९६

। ५० । ३०० । ४०० ।

विस्तृतानि शतं चैकं प्रांशूनि च चतुःशतम् । वज्रमूलाग्रवैडूर्यसर्वरत्नानि सर्वतः ॥९७

। १०० । ४०० ।

षष्टिमात्रं[1] प्रविष्टो गां ततो द्विगुणविस्तृतः । प्रासादः षट्छतोच्छ्रायः सौधर्मे स्तम्भनामकः ॥९८

। ६० । १२० । ६०० ।

षष्टया देवीसहस्राणां नियुतेनैव सेवितः । नित्यप्रमुदितः शक्रः तत्रास्ते सुखसागरे ॥९९

। १६०००० ।

पञ्चाशतं प्रविष्टा गां ततो द्विगुणविस्तृताः । प्रासादा अग्रदेवीनामष्टौ पञ्चशतोच्छ्रयाः ॥१००

। ५० । १०० । ५०० ।

कनकश्रीरिति ख्याता देवी वल्लभिका शुभा । पूर्वस्यां शक्रतस्तस्याः प्रासादोऽत्र मनोहरः ॥१०१

उत्तरस्यां दिशायां तु प्रभायाः श्रेणिसंस्थितम् । अष्टादशविमानं तत् ईशानो यत्र देवराट् ॥१०२

सौधर्म इन्द्र रहता है ॥ ९३ ॥ वहापर चौरासी हजार (८४०००) योजन विस्तृत और सुवर्णमय प्राकारसे वेष्टित सौधर्म इन्द्रका नगर है ॥ ९४ ॥ प्राकारके अग्रभाग कहींपर पंक्तिबद्ध विचित्र ध्वजाओंसे तथा कहींपर मयूराकार यत्रोंसे सुशोभित होते है ॥ ९५ ॥ प्राकार पृथिवीके भीतर पचास (५०) योजन अवगाहसे सहित, उतना (५०) ही विस्तृत तथा तीन सौ (३००) योजन ऊंचा है। इसके पूर्वमें चार सौ (४००) गोपुरद्वार हैं ॥ ९६ ॥ ये गोपुरद्वार एक सौ (१००) योजन विस्तृत और चार सौ (४००) योजन ऊंचे हैं। उनका मूल भाग वज्रमय तथा उपरिम भाग सब ओर वैडूर्यमणिमय व सर्वरत्नमय है ॥ ९७ ॥ सौधर्म इन्द्रका स्तम्भ नामक प्रासाद साठ (६०) योजन मात्र पृथिवीके भीतर प्रविष्ट (अवगाढ), इससे दूना (१२० यो.) विस्तृत और छह सौ योजन (६००) ऊचा है ॥ ९८ ॥ उक्त प्रासादके भीतर एक लाख साठ हजार (१६००००) देवियोंसे सेवित सौधर्म इन्द्र निरन्तर आनन्दको प्राप्त होकर सुखसमुद्रमे मग्न रहता है ॥ ९९ ॥

सौधर्म इन्द्रकी अग्रदेवियोंके आठ प्रासाद पचास (५०) योजन पृथिवीमें प्रविष्ट, उससे दूने (१०० यो.) विस्तृत और पाच सौ (५००) योजन ऊंचे हैं ॥ १०० ॥ सौधर्म इन्द्रकी कनकश्री इस नामसे प्रसिद्ध श्रेष्ठ वल्लभा देवी है। उसका मनोहर प्रासाद यहा सौधर्म इन्द्रके प्रासादकी पूर्व दिशामें स्थित है ॥ १०१ ॥

प्रभा नामक इन्द्रककी उत्तर दिशामें जो अठारहवां श्रेणीबद्ध विमान स्थित है उसमें

---

१ आ ब षष्ठिमात्रं ।

सौधर्मस्यैव मानेन प्रासादो नगरं तथा । अशीतिः स्यात् सहस्राणि हेममालास्य वल्लभा ॥१०३

। ८०००० ।

ऊर्ध्वं प्रभायाश्चक्राख्यमष्टमं चेन्द्रकं ततः । सनत्कुमार इन्द्रश्च दक्षिणे षोडशे स्थितः ॥१०४

योजनानि त्वसंख्यानि दक्षिणां व्यतिपत्य च । द्विसप्ततिसहस्राणि विस्तृतं प्रवरं पुरम् ॥१०५

। ७२००० ।

पञ्चवर्गावगाढश्च सालस्तावच्च विस्तृतः । सौवर्णः सर्वतस्तस्य प्रांशुः सार्धशतद्वयम् ॥१०६

। २५ । [२५] । २५० ।

त्रिशतं गोपुराणां च प्रत्येकं दिक्चतुष्टये । विस्तारो नवतिस्तेषामुच्छ्रयश्च शतत्रयम् ॥१०७

। ३०० । ९० । ३०० ।

शतार्धमवगाढो गां शतमेव च विस्तृत. । [1]प्रासादोऽर्धसहस्रोच्च इन्द्रानन्दकरः शुभः ॥१०८

। ५० । १०० । ५०० ।

द्विसप्तत्या सहस्राणां देवीभिर्नित्यसेवितः । अष्टावग्रमहिष्यस्तु वल्लभा कनकप्रभा ॥१०९

। ७२००० ।

नवतिविस्तृतास्तासां तदर्धं च गताः[2] क्षितौ । प्रासादाः परितस्तस्मादुच्चाः सार्धचतुःशतम् ॥११०

। ९० । ४५ । ४५० ।

ईशान इन्द्र रहता है ॥ १०२ ॥ उसका प्रासाद प्रमाणमें सौधर्म इन्द्रके समान है । उसके नगरका विस्तार अस्सी हजार (८००००) योजन तथा वल्लभा देवीका नाम हेममाला है ॥ १०३ ॥

प्रभा नामक इन्द्रकके ऊपर चक्र नामका आठवां (प्रभाके साथ) इन्द्रक है। उसके दक्षिण-में स्थित सोलहवें श्रेणीबद्ध विमानमें सनत्कुमार इन्द्र स्थित है ॥ १०४ ॥ दक्षिणमे असख्यात योजन जाकर उसका बहत्तर हजार (७२०००) योजन विस्तृत श्रेष्ठ नगर है ॥ १०५ ॥ इस नगरका सुवर्णमय प्राकार पच्चीस (२५) योजन नीवसे सहित, उतना (२५ यो.) ही विस्तृत और अढाई सौ (२५०) योजन सब ओर ऊंचा है ॥ १०६ ॥ उसकी चारो दिशाओमेसे प्रत्येक दिशामें तीन सौ (३००) गोपुरद्वार है । उनका विस्तार नब्बे (९०) योजन और ऊंचाई तीन सौ (३००) योजन मात्र है ॥ १०७ ॥ वहां इन्द्रको आनन्दित करनेवाला जो उत्तम प्रासाद स्थित है वह पृथिवीमे पचास (५०) योजन प्रमाण अवगाहसे सहित, सौ (१००) योजन विस्तृत और पाच सौ (५००) योजन ऊचा है ॥ १०८ ॥ उक्त सनत्कुमार इन्द्रकी बहत्तर हजार (७२०००) देवियां सदा सेवा करती है । उनमे आठ अग्रदेवियां हैं । उसकी वल्लभा देवीका नाम कनकप्रभा है ॥ १०९ ॥ उन देवियोंके प्रासाद नब्बे (९०) योजन विस्तृत, इससे आधे (४५ यो.) पृथिवीमें प्रविष्ट और साड़े चार सौ (४५०) योजन ऊंचे है । ये प्रासाद उस इन्द्र-प्रासादके चारों ओर हैं ॥ ११० ॥

१ प प्रासादोर्ध्वं । २ आ प ष गगताः ।

उत्तरस्यां पुनश्चक्रात्[१] षोडशावलिकास्थितम् । माहेन्द्रनगरं रुन्द्रं सहस्राणां च सप्ततिः ॥११
। ७०००० ।
अष्टावग्रमहिष्यश्च देवी कनकमण्डिता । वल्लभा तस्य विख्याता तासां वेश्मानि पूर्ववत् ॥११२
चक्राद् ब्रह्मोत्तरं चोर्ध्वं पञ्चमं दक्षिणे ततः । पुरं चतुर्दशे षष्टि सहस्राणां च विस्तृतम् ॥११३
। ६०००० ।
सार्धानि द्वादशागाढस्तावदेव च विस्तृतः । प्राकारो द्विशतोच्छ्रायो ब्रह्मणः पुरबाहिरः ॥११४
। २५/२ । २५/२ । २०० ।
गोपुराणां शते द्वे च एकैकस्यां पुनर्दिशि । अशीतिं विस्तृतं वेद्यं शुद्धं द्विशतमुच्छ्रितम् ॥११५
। २०० । २०० (?) । ८० । २०० ।
प्रासादो नवतिं रुन्द्रस्तदर्धं च क्षितौ गतः । ब्रह्मेन्द्रस्य शुभो दिव्य उच्चः सार्धचतुःशतम् ॥११६
। ९० । ४५ । ४५० ।
अशीतिरुन्द्रा देवीनां तदर्धं च क्षितिं गताः । चतुःशतोच्छ्रयाश्चैव अष्टानामिति वर्णिताः ॥११७
। ८० । ४० । ४०० ।
चतुस्त्रिंशत्सहस्राणि देव्यस्तं सतताश्रिताः । नीला वल्लभिका नाम्ना प्रासादोऽस्याश्च पूर्वतः ॥११८
। ३४००० ।
उत्तरस्यां पुनः पङ्क्तौ इन्द्रो ब्रह्मोत्तरस्तथा । नीलोत्पलेति नाम्ना च तस्य वल्लभिकामरी ॥११९
ब्रह्मोत्तरात्तृतीयं तु नाम्ना लान्तवमिन्द्रकम् । दक्षिणस्यां ततः पङ्क्तौ द्वादशे लान्तवं पुरम् ॥१२०

उक्त चक्र इन्द्रकके उत्तर दिशामें स्थित सोलहवे श्रेणीबद्ध विमानमें माहेन्द्र इन्द्रका नगर स्थित है। उसका विस्तार सत्तर हजार (७००००) योजन है ॥ १११॥ उसके आठ अग्रदेवियां और कनकमण्डिता नामकी प्रसिद्ध वल्लभा देवी है। उनके प्रासाद सनत्कुमार इन्द्रकी देवियोके प्रासादोंके समान हैं॥ ११२॥

चक्र इन्द्रकके ऊपर उसको लेकर पांचवा ब्रह्मोत्तर नामका इन्द्रक है। उसके दक्षिणमें चौदहवें श्रेणीबद्ध विमानमे ब्रह्मेन्द्रका पुर है। उसका विस्तार साठ हजार (६००००) योजन है। इस पुरके बाहिर साढे बारह (२५/२) योजन अवागाहसे सहित, उतना ही (२५/२) विस्तृत और दो सौ (२००) योजन ऊचा प्राकार है ॥ ११३-११४॥ इस प्राकारकी प्रत्येक दिशामे दो सौ (२००) गोपुरद्वार है। गोपुरद्वारोका विस्तार अस्सी (८०) योजन [इतना (८० यो.) ही अवगाह] और ऊचाई शुद्ध दो सौ योजन प्रमाण जाननी चाहिये ॥ ११५॥ ब्रह्मेन्द्रका दिव्य उत्तम प्रासाद नब्बै (९०) योजन विस्तृत, इससे आधा (४५) पृथिवीमें प्रविष्ट और चार सौ पचास (४५०) योजन ऊचा है॥ ११६॥ ब्रह्मेन्द्रकी आठ अग्रदेवियोके प्रासाद अस्सी (८०) योजन विस्तृत, इससे आधे (४० यो.) पृथिवीमें प्रविष्ट और चार सौ (४००) योजन ऊंचे कहे गये है॥ ११७॥ चौतीस हजार (३४०००) देवियां निरन्तर उसके आश्रित रहती हैं। उसकी वल्लभा देवीका नाम नीला है। इसका प्रासाद इन्द्रप्रासादके पूर्वमें स्थित है ॥ ११८॥

ब्रह्मोत्तर इन्द्रककी उत्तरदिशागत पंक्तिके चौदहवें श्रेणीबद्ध विमानमे ब्रह्मोत्तर इन्द्र रहता है। उसकी वल्लभा देवीका नाम नीलोत्पला है॥ ११९॥

ब्रह्मोत्तर इन्द्रकको लेकर जो तीसरा लान्तव नामका इन्द्रक है उसकी दक्षिण दिशागत

१ आ प पुनः शक्रात् ।

पञ्चाशतं सहस्राणि तद्विस्तारेण वर्णितम् । हेमसालपरिक्षिप्तं लान्तवेन्द्रमनःप्रियम्[1] ॥१२१
। ५०००० ।
सचतुर्भागषड्गाढस्तावदेव च विस्तृतः । पञ्चाशं शतमुद्विद्धः प्राकारस्तस्य भासुरः ॥१२२
। २५/४ । [२५/४] । १५० ।
गोपुराणां शतं षष्टया प्राच्यां सप्ततिविस्तृतम् । सषष्टिशतमुद्विद्धं दिक्षु सर्वासु लक्षयेत् ॥१२३
। १६० । ७० । १६० ।
प्रासादोऽशीतिविस्तारस्तदर्धं च क्षितिं गतः । चतुःशतोच्छ्रयो रम्यो लान्तवो यत्र देवराट् ॥१२४
। ८० । ४० । [४००] ।
प्रासादाः सप्ततिं रुन्द्रास्तदर्धं च क्षितिं गताः । उच्छ्रितास्त्रिशतं सार्धं देवीनामिति वर्णिताः ॥१२५
। ७० । ३५ । ३५० ।
सार्धैः षोडशभिः स्त्रीणां सहस्रैः परिवारितः । अष्टावग्रमहिष्यश्च पद्मा नाम्ना च वल्लभा ॥१२६
। १६५०० ।
उत्तरस्तत्र कापित्थो लान्तवेन समः स्मृतः । पद्मोत्पलेति नाम्ना च वल्लभा तस्य विश्रुता ॥१२७
लान्तवोर्ध्वं भवेच्छुक्रमिन्द्रकं दक्षिणे ततः । चत्वारिंशत्सहस्त्रोरुद[र्द]शमे शुक्रसत्पुरम् ॥१२८
। ४०००० ।
चतुष्कमवगाढो गां तावदेव च विस्तृतः । विंशं च शतमुद्विद्धः प्राकारस्तस्य सर्वतः ॥१२९
। ४ । ४ । १२० ।

पंक्तिके बारहवें श्रेणीबद्ध विनानमें लान्तव इन्द्रका पुर है ॥ १२० ॥ उसका विस्तार पचास हजार (५००००) योजन प्रमाण बतलाया गया है। लान्तवेन्द्रके मनको प्रसन्न करनेवाला वह पुर सुवर्णमय प्राकारसे वेष्टित है ॥ १२१ ॥ पुरका वह प्राकार सवा छह (६¼) योजन अवगाहसे सहित, उतना (६¼) ही विस्तृत और एक सौ पचास (१५०)योजन ऊंचा है ॥१२२॥ प्राकारकी पूर्व दिशामे एक सौ साठ (१६०) गोपुरद्वार है। उनका विस्तार सत्तर (७०) योजन और ऊंचाई एक सो साठ (१६०) योजन मात्र है। इतने (१६०) गोपुरद्वार सब दिशाओंमे जानना चाहिये ॥ १२३ ॥ उस पुरमे अस्सी (८०) योजन विस्तृत, इससे आधा (४० यो.) पृथिवीमें प्रविष्ट और चार सौ (४००) योजन ऊंचा रमणीय प्रासाद है, जहां लान्तव इन्द्र रहता है ॥ १२४ ॥ लान्तवेन्द्रकी देवियोके प्रासाद सत्तर (७०) योजन विस्तृत, इससे आधे (३५ यो.) पृथिवीमे प्रविष्ट और साढे तीन सौ (३५०) योजन ऊंचे कहे गये हैं ॥१२५॥ साढे सोलह हजार (१६५००)स्त्रियोसे वेष्टित उस इन्द्रके आठ अग्रदेवियां और पद्मा नामकी वल्लभा देवी है ॥ १२६ ॥

लान्तव इन्द्रककी उत्तर दिशामें स्थित बारहवें श्रेणीबद्ध विमानमें कापिष्ठ इन्द्र रहता है जो कि लान्तव इन्द्रके समान माना गया है। उसकी वल्लभा देवी पद्मोत्पला नामसे प्रसिद्ध है ॥ १२७ ॥

लान्तव इन्द्रकके ऊपर शुक्र इन्द्रक है। उसके दक्षिणमे दसवें श्रेणीबद्धमें शुक्र इन्द्रका उत्तम पुर है जो चालीस हजार (४००००) योजन विस्तृत है ॥ १२८ ॥ उसके सब ओर चार (४) योजन पृथिवीमे प्रविष्ट, उतना (४ यो.) ही विस्तृत और एक सौ बीस (१२०) योजन

१ प मतः प्रिय ।

चत्वारिंशं शतं तस्य गोपुराणि चतुर्दिशम् । पञ्चाशतं च विस्तीर्णं चत्वारिंश-शतोच्छ्रितम् ॥१३०

। १४० । ५० । १४० ।

पञ्चत्रिंशतमागाढो विस्तृतो द्विगुणं ततः । प्रासादः शुक्रदेवस्य [1]सार्धत्रिशतमुच्छ्रितः ॥१३१

। ३५ । ७० । ३५० ।

प्रविष्टास्त्रिंशतं भौं[भू]मौ द्विगुणं चापि विस्तृताः । प्रासादास्त्रिशतोच्छ्राया देवीनां तत्र वर्णिताः ॥

। ३० । ६० । ३०० ।

लान्तवार्धं प्रिया देव्यः शुक्रस्यापि च वर्णिताः । अष्टावग्रमहिष्यश्च नन्दा तासु च वल्लभा ॥१३३

। ८२५० ।

उत्तरोऽत्र महाशुक्रो नन्दावत्यपि वल्लभा । शुक्रवत्परिवारोऽस्य नगरं च निर्दशितम् ॥१३४

शुक्राच्छतारमूर्ध्वं स्यात्तस्माद्दक्षिणतो दिशि । त्रिंशत्सहस्रविस्तीर्णं शतारं[2] पुरमष्टमे ॥१३५

। ३०००० ।

त्रियोजनं गतो भूम्यां तावदेव च विस्तृतः । प्राकारः शतमुद्विद्धः सविंशशतगोपुरः ॥१३६

। ३ । ३ । १०० । १२० ।

चत्वारिंशत्स्वविस्तारं विंशं च शतमुच्छ्रितम् । एकैकगोपुरं विद्यात्तावन्त्येवान्यदिक्षु च ॥१३७

। ४० । १२० ।

ऊंचा प्राकार स्थित है ॥ १२९ ॥ उसकी चारो दिशाओंमेंसे प्रत्येकमे एक सौ चालीस (१४०) गोपुरद्वार स्थित है। उनका विस्तार पचास (५०) योजन और ऊचाई एक सौ चालीस (१४०) योजन है ॥ १३० ॥ उस पुरमें पैंतीस (३५) योजन अवगाहसे सहित, इससे दूना (७० यो) विस्तृत और साढ़े तीन सौ (३५०) योजन ऊचा शुक्र देवका प्रासाद है ॥१३१॥ वहां शुक्र इन्द्रकी देवियोके प्रासाद तीस (३०) योजन पृथिवीमें प्रविष्ट, इससे दूने (६०यो.) विस्तृत और तीन सौ (३००) योजन ऊंचे कहे गये है ॥ १३२ ॥ शुक्र इन्द्रकी प्रिय देवियां लान्तव इन्द्रकी देवियोसे आधी (८२५०) निर्दिष्ट की गई है। उनमें आठ अग्रदेवियां और नन्दा नामकी वल्लभा देवी है ॥ १३३ ॥

शुक्र इन्द्रकके उत्तरमें दसवें श्रेणीबद्धमें महाशुक्र इन्द्रक रहता है। उसकी वल्लभा देवीका नाम नन्दावती है। इसका परिवार और नगर शुक्र इन्द्रके समान निर्दिष्ट किया गया है ॥ १३४ ॥

शुक्र इन्द्रकके ऊपर शतार इन्द्रक स्थित है। उसकी दक्षिण दिशामें स्थित आठवें श्रेणीबद्ध विमानमें तीस हजार (३००००)योजन विस्तारवाला शतार इन्द्रका पुर है ॥१३५॥ उस पुरको वेष्टित करके तीन (३) योजन पृथिवीमे प्रविष्ट, उतना (३ यो.) ही विस्तृत और सौ (१००) योजन ऊंचा प्राकार स्थित है। उसकी प्रत्येक दिशामें एक सौ बीस(१२०) गोपुरद्वार हैं ॥ १३६ ॥ एक एक गोपुर द्वारका विस्तार चालीस (४०) योजन और ऊंचाई एक सौ बीस (१२०) योजन है। इतने (१२०) ही गोपुरद्वार अन्य तीन दिशाओंमें भी स्थित

१ आ प सार्धं । २ प शतारं ।

त्रिंशतं भूमिमागाढस्तस्माद्विगुणविस्तृतः । प्रासादस्त्रिशतोच्छ्रायः शतारेन्द्रस्य भाषितः ॥१३८

।३०।६०।३००।

चत्वारि च सहस्राणि पञ्चविंशं पुनः शतम् । देव्यस्तस्य समाख्याताः सुसीमेति च वल्लभा॥१३९

।४१२५।

पञ्चवर्गं प्रविष्टा गां तस्माद् द्विगुणविस्तृताः । पञ्चाशे द्वे शते चोच्चाः प्रासादास्तस्य योषिताम् ॥

।२५।५०।२५०।

उत्तरोऽत्र सहस्रारः शतारस्येव वर्णनम् । वल्लभा लक्ष्मणा नाम्ना देवी तस्य मनोहरा ॥१४१

शताराख्यात्तदुत्पद्य सप्तमं त्वच्युतेन्द्रकम् । दक्षिणावलिकायां च षष्ठे चारणसेवितम् ॥१४२

विंशतिं च सहस्राणि विस्तृतं त्वारणं पुरम् । द्वे सार्धे गाहविस्तारः प्राकारोऽशीतिमुच्छ्रितः ॥१४३

।२००००। ५/२ ।८०।

गोपुराणां शतं दिक्षु त्रिंशद्विस्तारकाणि च । शतोच्छ्रितानि सर्वाणि नगरस्यारणस्य तु ॥१४४

।१००।३०।१००।

पञ्चवर्गं त[ग]तो भूमिं तस्माद्विगुणविस्तृतः । प्रासादश्चारणेन्द्रस्य सार्धं द्विशतमुच्छ्रितः ॥१४५

।२५।५०।२५०।

द्वे सहस्रे त्रिषष्टिश्च तस्य देव्यः प्रकीर्तिताः । अष्टावग्रमहिष्यश्च जिनदत्ता च वल्लभा ॥१४६

।२०६३।

प्रविष्टा विंशतिं भूमिं तस्माद्विगुणविस्तृताः । प्रासादा द्विशतोच्छ्राया देवीनामिति वर्णिताः ॥१४७

।२०।४०।२००।

हैं ॥ १३७ ॥ शतार इन्द्रका प्रासाद तीस (३०) योजन पृथिवीमे प्रविष्ट, इससे दूना (६०) विस्तृत और तीन सौ (३००) योजन ऊचा कहा गया है ॥ १३८ ॥ शतार इन्द्रके चार हजार एक सौ पच्चीस (४१२५) देविया कही गई हैं। उसकी वल्लभा देवीका नाम सुसीमा है ॥१३९॥ उसकी देवियोके प्रासाद पच्चीस (५×५) योजन पृथिवीमे प्रविष्ट, उससे दूने (५० यो.) विस्तृत और दो सौ पचास (२५०) योजन उचे है ॥ १४० ॥

शतार इन्द्रककी उत्तर दिशामे स्थित आठवें श्रेणीबद्ध विमानमें सहस्रार इन्द्र रहता है। उसका वर्णन शतार इन्द्रकके समान है। उसके लक्ष्मणा नामकी मनोहर वल्लभा देवी है ॥ १४१ ॥

